मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥*॥
अर्व्वाक् षण्मासतः स्त्रीणां यदि स्यात् गर्भ-
संस्रवः ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥
गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्र्यहः ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ॥
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ।
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ।
शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः ।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥*॥
दत्ता नारी पितुर्गेहे सूयते म्रियतेऽथवा ।
स्वमशौचं चरेत् सम्यक् पृथक्स्थानव्यवस्थिता ॥
तद्बन्धुवर्गस्त्वेकेन शुध्येत्तु जनकस्त्रिभिः ।
यैस्तैः सहाशनं कुर्य्यात् शयनादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥
स्त्रीणामसंस्कृतानान्तु त्र्यहात् शुध्यन्ति
बान्धवाः ।
यथोक्तेनैव कल्पेन शुध्यन्ति हि सनाभयः ॥*॥
षण्मासाभ्यन्तरे शूद्रे मृते बाले त्र्यहं विदुः ।
अनतीते द्विवर्षे वै मृते शुध्येत्तु पञ्चभिः ॥
बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम् ॥
नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता ।
निर्वृत्तचूड़कानान्तु त्रिरात्राच्छुद्धिरिष्यते ॥*॥
दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः ॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
दशमेऽहनि शूद्रस्य कार्य्यं संस्पर्शनं बुधैः ।
मासेनैव विशुद्धिः स्यात् सूतके मृतकेऽपि वा ॥
संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते ।
संस्कृते तु त्रिरात्रं स्यादिति धर्म्मो व्यवस्थितः ॥
पित्रोरुपरमे स्त्रीणामूढ़ानान्तु कथं भवेत् ।
त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् शिवः ॥
यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निःक्षिप्य तद्ग्रासं स्नात्वा चैव विशु-
ध्यति ॥*॥
चिकित्सको यत् कुरुते तदन्येन न शक्यते ।
तस्मात् चिकित्सकस्पर्शे शुद्धो भवति नित्यशः ॥
गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥*॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ।
एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्याद्द्व्यहेन तु ।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥*॥
नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
यद्यन्नमत्ति तेषान्तु स दशाहेन शुध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥*॥
अस्थिसञ्चयनादर्व्वाक् यदि विप्रोऽश्रु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति ॥
अस्थिसञ्चयनादूर्द्ध्वं यावन्मासं द्विजातयः ।
दिवसेनैव शुद्धिः स्याद्वाससां क्षालनेन च ॥*॥
स्वजातिर्दिवसेनैव त्र्यहात् क्षत्रियवैश्ययोः ।
स्पर्शं विनानुगमने शूद्रो नक्तेन शुध्यति ॥*॥
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुध्यन्ति भूमिष्ठञ्च नवोदकम् ॥*॥
उदक्या सूतिका वापि अन्त्यजं संस्पृशेद्यदि ।
त्रिरात्रेणैव शुद्धिः स्यादिति शातातपोऽब्र-
वीत् ॥*
नवप्रसूतजलं गावो महिष्यश्छागयोनयः ।
शुध्यन्ति दिवसैरेव दशभिर्नात्र संशयः ॥
काले नवोदकं शुद्धं न पातव्यन्तु तत्त्र्यहम् ॥"*॥
अथ द्रव्यशुद्धिः । ब्राह्मे ।
"सुवर्णरूप्यशङ्खाश्मशुक्तिरत्नमयानि च ।
कांसायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥
निर्लेपानि विशुध्यन्ति केवलेन जलेन तु ।
शूद्रोच्छिष्टानि शुध्यन्ति त्रिधाक्षाराम्ल-
वारिभिः ॥
सूतिकाशवविण्मूत्ररजस्वलाहतानि च ।
प्रक्षेप्तव्यानि तान्यग्नौ यत्र यावत् सहेदपि ॥"
रैत्यं पित्तलम् । त्रपु रङ्गम् । यत्पात्रं यावत् ।
कालमग्निं सहेत तत् पात्रं प्रक्षालनान्तरं ।
तावत्तापनीयमित्यर्थः ॥*॥ बृहस्पतिः ।
"अम्भसा हेमरूप्यायः कांस्यं शुध्येत भस्मना ।
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाकेन मृण्मयम् ॥"
राजधर्म्मे ।
"पञ्चलोच्छिष्टकांस्यं यत् गवाघ्रातमथापि वा ।
गण्डूषोच्छिष्टमपि च विशुध्येद्दशभिस्तु तत् ॥"
दशभिर्दिनैरिति शेषः । तथा च ।
"कांस्ये न धावयेत् पादौ यत्र स्यादपि भोजन-
मिति ।"
यत्र पात्रान्तरे भोजनं तत्र श्रुतस्यैव तस्य
साहचर्य्यात् कांस्यवच्छुद्धिः ॥ * ॥ बौधायनः ।
"भिन्नकांस्ये तु योऽश्नीयात् नद्यां स्नात्वा
जपेद्द्विजः ।
गायत्र्यष्टसहस्रन्तु एकभक्तस्ततः शुचिः ॥"
देवलः । ताम्ररजतसुवर्णाश्मस्फटिकानां भिन्न-
मभिन्नम् । इति भिन्नत्वेऽपि न दोष इत्यर्थः ॥*॥
विष्णुः । शारीरैर्मलैः सुराभिर्मद्यैर्व्वा यदुपहतं
तदत्यन्तोपहतं सर्व्वं लौहभाण्डमग्नौ प्रतप्तं
शुध्येत । मणिमयमश्ममयमब्जमयञ्च सप्तरात्रं
महीखननेन शृङ्गदन्तास्थिमयञ्च तक्षणेन दारु
मयं मृण्मयं जह्यादिति । लौहपदं सुवर्णाद्य-
ष्टकपरम् ॥ * ॥ मनुः ।
"त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥"
अदृष्टमुपघातशङ्कादिभिरघ्रातम् । अघ्रातञ्च
सदा शुचि इति याज्ञवल्क्यवाक्यत्वात् ।
वाचेति उपघातशङ्कायां पवित्रं भवत्विति
ब्राह्मणैर्वाचा प्रशस्यते इति शूलपाणिमहा-
महोपाध्यायकुल्लूकभट्टौ ॥ * ॥ शातातपः ।
"गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः ।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥"
मनुः ।
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च स्पर्शे मेध्यानि निर्द्दिशेत् ॥"
बौधायनः ।
"अदुष्टाः सन्ततधारा वातोद्धूताश्च रेणवः ।
आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम् ॥"
शङ्खलिखितौ । आकरद्रव्याणि प्रोक्षितानि
शुचीनि ॥*॥ यमः ।
"आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः
स्मृताः ॥"
विष्णुधर्म्मोत्तरे ।
"मुखवर्जञ्च गौः शुद्धा मार्ज्जारश्चक्रमे शुचिः ।
पुष्पाणाञ्च फलानाञ्च प्रोक्षणात् शुद्धिरिष्यते ॥"
अत्रिः ।
"मक्षिका सन्ततधारा भूमिस्तोयं हुताशनः ।
मार्ज्जारश्चापि दर्व्वी च मारुतश्च सदा
शुचिः ॥"
बौधायनः । अनेकोद्धाह्ये दारुशिले भूमिसमे
इष्टकाश्च सङ्कीर्णीभूताः इति । सङ्कीर्णीभूताः
परस्परसम्बद्धाः ॥*॥ विष्णुः । प्रोक्षणेन पुस्तकं
इति ॥*॥ शातातपः ।
"तापनं घृततैलानां प्लावनं गोरसस्य च ।
तन्मात्रमुद्धृतं शुध्येत् कठिनन्तु पयो दधि ।
अविलीनं तथा सर्पिर्व्विलीनं श्रपणेन तु ॥"
अविलीनं कठिनम् ॥*॥ मनुः ।
"द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥"
इदन्तूच्छिष्टाद्यल्पदोषे । उत्प्लवनं वस्त्रान्तर-
निर्व्वापणेन कीटाद्यपनयनम् ॥*॥ शातातपः ।
"क्लीवाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ।
दृष्टं वा स्यात् यदन्नन्तु तस्य निष्कृतिरुच्यते ॥
अभ्युक्ष्य किञ्चिदुद्धृत्य भुञ्जीताप्यविशङ्कितः ॥*॥
देवलः ।
"चाण्डालेन शुना वापि दृष्टं हविरयज्ञियम् ।
विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् ॥"
अन्यत्र हिरण्योदकस्पर्शादिति ॥ * ॥ मनुः ।
"अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥"
शुद्धिरित्यनुवृत्तौ विष्णुः । गुड़ानामिक्षुविका-
राणां प्रभूतानां वाह्निदानेन सर्व्वलवणाना-
ञ्चेति ॥*॥ अङ्गिराः ।
"यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः
शूद्रादिस्पृष्टेष्वन्नं प्रविष्टन्तु सदा शुचि ॥"
प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः ॥
"सकुणपं सकर्द्दमं तेभ्यस्तोयमपास्य तत् ।
प्रक्षिपेत् पञ्चगव्यञ्च समन्तं सर्व्वशुद्धिकृत् ॥
अपास्य कुणपं तेभ्यो जहुतोऽशेष एव वा ।